শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ সপ্তদশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ সপ্তদশঃ সর্গঃ ॥

## ব্রহ্মণঃ প্রেরণযা দেৱাদিভির্বিভিন্নৱানরযূথপতীনামুৎপাদনম্

পুত্রৎৱং তু গতে ৱিষ্ণৌ রাজ্ঞস্তস্য মহাত্মনঃ।
উৱাচ দেৱতাঃ সর্ৱাঃ স্বযম্ভূর্ভগৱানিদম্॥ **1.17.1** ॥

সত্যসন্ধস্য ৱীরস্য সর্ৱেষাং নো হিতৈষিণঃ।
ৱিষ্ণোঃ সহাযান্ বলিনঃ সৃজধ্ৱং কামরূপিণঃ॥ **1.17.2** ॥

মাযাৱিদশ্চ শূরাংশ্চ ৱাযুৱেগসমান্ জৱে।
নযজ্ঞান্ বুদ্ধিসম্পন্নান্ ৱিষ্ণুতুল্যপরাক্রমান্॥ **1.17.3** ॥

অসংহার্যানুপাযজ্ঞান্ দিৱ্যসংহননান্বিতান্।
সর্ৱাস্ত্রগুণসম্পন্নানমৃতপ্রাশনানিৱ॥ **1.17.4** ॥

অপ্সরস্সু চ মুখ্যাসু গন্ধর্ৱীণাং তনূষু চ।
যক্ষপন্নগকন্যাসু ঋক্ষৱিদ্যাধরীষু চ॥ **1.17.5** ॥

কিন্নরীণাং চ গাত্রেষু ৱানরীণাং তনূষু চ।
সৃজধ্ৱং হরিরূপেণ পুত্রাংস্তুল্যপরাক্রমান্॥ **1.17.6** ॥

পূর্ৱমেৱ মযা সৃষ্টো জাম্বৱানৃক্ষপুঙ্গৱঃ।
জৃম্ভমাণস্য সহসা মম ৱক্ত্রাদজাযত॥ **1.17.7** ॥

তে তথোক্তা ভগৱতা তৎ প্রতিশ্রুত্য শাসনম্।
জনযামাসুরেৱং তে পুত্রান্ ৱানররূপিণঃ॥ **1.17.8** ॥

ঋষযশ্চ মহাত্মানঃ সিদ্ধৱিদ্যাধরোরগাঃ।
চারণাশ্চ সুতান্ ৱীরান্ সসৃজুর্ৱনচারিণঃ॥ **1.17.9** ॥

ৱানরেন্দ্র মহেন্দ্রাভমিন্দ্রো ৱালিনমাত্মজম্।
সুগ্রীৱং জনযামাস তপনস্তপতাং ৱরঃ॥ **1.17.10** ॥

বৃহস্পতিস্ত্বজনযৎ তারং নাম মহাকপিম্।
সর্ৱৱানরমুখ্যানাং বুদ্ধিমন্তমনুত্তমম্॥ **1.17.11** ॥

ধনদস্য সুতঃ শ্রীমান্ ৱানরো গন্ধমাদনঃ।
ৱিশ্ৱকর্মা ৎৱজনযন্নলং নাম মহাকপিম্॥ **1.17.12** ॥

পাৱকস্য সুতঃ শ্রীমান্ নীলোঽগ্নিসদৃশপ্রভঃ।
তেজসা যশসা ৱীর্যাদত্যরিচ্যত ৱীর্যৱান্॥ **1.17.13** ॥

রূপদ্রৱিণসম্পন্নাৱশ্ৱিনৌ রূপসম্মতৌ।
মৈন্দং চ দ্ৱিৱিদং চৈৱ জনযামাসতুঃ স্ৱযম্॥ **1.17.14** ॥

ৱরুণো জনযামাস সুষেণং নাম ৱানরম্।
শরভং জনযামাস পর্জন্যস্তু মহাবলঃ॥ **1.17.15** ॥

মারুতস্যৌরসঃ শ্রীমান্ হনূমান্ নাম ৱানরঃ।
ৱজ্রসংহননোপেতো ৱৈনতেযসমো জৱে॥ **1.17.16** ॥

সর্ৱৱানরমুখ্যেষু বুদ্ধিমান্ বলৱানপি।
তে সৃষ্টা বহুসাহস্রা দশগ্রীৱৱধোদ্যতাঃ॥ **1.17.17** ॥

অপ্রমেযবলা ৱীরা ৱিক্রান্তাঃ কামরূপিণঃ।
তে গজাচলসঙ্কাশা ৱপুষ্মন্তো মহাবলাঃ॥ **1.17.18** ॥

ঋক্ষৱানরগোপুচ্ছাঃ ক্ষিপ্রমেৱাভিজজ্ঞিরে।
যস্য দেৱস্য যদ্রূপং ৱেষো যশ্চ পরাক্রমঃ॥ **1.17.19**॥

অজাযত সমং তেন তস্য তস্য পৃথক্ পৃথক্।
গোলাঙ্গূলেষু চোৎপন্নাঃ কিঞ্চিদুন্নতৱিক্রমাঃ॥ **1.17.20**॥

ঋক্ষীষু চ তথা জাতা ৱানরাঃ কিন্নরীষু চ।
দেৱা মহর্ষিগন্ধর্ৱাস্তার্ক্ষ্যযক্ষা যশস্বিনঃ॥ **1.17.21**॥

নাগাঃ কিম্পুরুষাশ্চৈৱ সিদ্ধৱিদ্যাধরোরগাঃ।
বহৱো জনযামাসুর্হৃষ্টাস্তত্র সহস্রশঃ॥ **1.17.22**॥

চারণাশ্চ সুতান্ ৱীরান্ সসৃজুর্ৱনচারিণঃ।
ৱানরান্ সুমহাকাযান্ সর্ৱান্ ৱৈ ৱনচারিণঃ॥ **1.17.23**॥

অপ্সরস্সু চ মুখ্যাসু তথা ৱিদ্যাধরীষু চ।
নাগকন্যাসু চ তদা গন্ধর্ৱীণাং তনূষু চ।
কামরূপবলোপেতা যথাকামৱিচারিণঃ॥ **1.17.24**॥

সিংহশার্দূলসদৃশা দর্পেণ চ বলেন চ।
শিলাপ্রহরণাঃ সর্ৱে সর্ৱে পর্ৱতযোধিনঃ॥ **1.17.25**॥

নখদংষ্ট্রাযুধাঃ সর্ৱে সর্ৱে সর্ৱাস্ত্রকোৱিদাঃ।
ৱিচালযেযুঃ শৈলেন্দ্রান্ ভেদযেযুঃ স্থিরান্ দ্রুমান্॥ **1.17.26**॥

ক্ষোভযেযুশ্চ ৱেগেন সমুদ্রং সরিতাং পতিম্।
দারযেযুঃ ক্ষিতিং পদ্ভ্যামাপ্লৱেযুর্মহার্ণৱান্॥ **1.17.27**॥

নভস্তলং ৱিশেযুশ্চ গৃহ্ণীযুরপি তোযদান্।
গৃহ্ণীযুরপি মাতঙ্গান্ মত্তান্ প্রব্রজতো ৱনে॥ **1.17.28**॥

নর্দমানাংশ্চ নাদেন পাতযেযুর্ৱিহঙ্গমান্।
ঈদৃশানাং প্রসূতানি হরীণাং কামরূপিণাম্॥ **1.17.29** ॥

শতং শতসহস্রাণি যূথপানাং মহাত্মনাম্।
তে প্রধানেষু যূথেষু হরীণাং হরিযূথপাঃ ॥ **1.17.30** ॥

বভূৱুর্যূথপশ্রেষ্ঠান্ ৱীরাংশ্চাজনযন্ হরীন্।
অন্যে ঋক্ষৱতঃ প্রস্থানুপতস্থুঃ সহস্রশঃ ॥ **1.17.31** ॥

অন্যে নানাৱিধাঞ্শৈলান্ কাননানি চ ভেজিরে।
সূর্যপুত্রং চ সুগ্রীৱং শক্রপুত্রং চ ৱালিনম্॥ **1.17.32** ॥

ভ্রাতরাৱুপতস্থুস্তে সর্ৱে চ হরিযূথপাঃ।
নলং নীলং হনূমন্তমন্যাংশ্চ হরিযূথপান্॥ **1.17.33** ॥

তে তার্ক্ষ্যবলসম্পন্নাঃ সর্ৱে যুদ্ধৱিশারদাঃ।
ৱিচরন্তোঽর্দযন্ সর্ৱান্ সিংহৱ্যাঘ্রমহোরগান্॥ **1.17.34** ॥

মহাবলো মহাবাহুর্ৱালী ৱিপুলৱিক্রমঃ।
জুগোপ ভুজৱীর্যেণ ঋক্ষগোপুচ্ছৱানরান্॥ **1.17.35** ॥

তৈরিযং পৃথিৱী শূরৈঃ সপর্ৱতৱনার্ণৱা।
কীর্ণা ৱিৱিধসংস্থানৈর্নানাৱ্যঞ্জনলক্ষণৈঃ ॥ **1.17.36** ॥

তৈর্মেঘৱৃন্দাচলকূটকল্পৈঃ
মহাবলৈর্ৱানরযূথপালৈঃ।
বভূৱ ভূর্ভীমশরীররূপৈঃ
সমাৱৃতা রামসহাযহেতোঃ ॥ **1.17.37** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে সপ্তদশঃ সর্গঃ ॥